योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८७

सप्ताशीतितमः सर्गः ८७

श्रीवसिष्ठ उवाच ।

एवं कलितवानन्तः प्रशान्तमननैषणः ।

शनैरुच्चारयंस्तारं प्रणवं प्राप्तभूमिकः ।। १

मात्रादिपादभेदेन प्रणवं संस्मरन्यतिः ।

अध्यारोपापवादेन स्वरूपं शुद्धमव्ययम् ।। २

सबाह्याभ्यन्तरान्भागान्स्थूलान्सूक्ष्मतरानपि ।

त्रैलोक्यसंभवांस्त्यक्त्वा संकल्पाकल्पकल्पितान् ।। ३

तिष्ठन्नक्षुभिताकारश्चिन्तामणिरिवात्मनि ।

संपूर्ण इव शीतांशुर्विश्रान्त इव मन्दरः ।। ४

कुम्भकारगृहे चक्रं संरोधित इव भ्रमात् ।

अम्भोधिरिव संपूर्णस्तिमितस्फारनिर्मलः ।। ५

शान्ततेजस्तमःपुञ्जं विगतार्केन्दुतारकम् ।

अधूमाभ्ररजःस्वच्छमनन्तं शरदीव खम् ।। ६

सहप्रणवपर्यन्तदीर्घनिःस्वनतन्तुना ।

जहाविन्द्रियतन्मात्रजालं गन्धमिवानिलः ।। ७

ततो जहौ तमोमात्रं प्रतिभातमिवाम्बरे ।

उत्तिष्ठत्प्रस्फुरद्रूपं प्राज्ञः कोपलवं यथा ।। ८

प्रतिभातं ततस्तेजो निमेषार्धं विचार्य सः ।

जहौ बभूव च तदा न तमो न प्रकाशकम् ।। ९

तामवस्थामथासाद्य मनसा तन्मनस्तृणम् ।

मनागपि प्रस्फुरितं निमिषार्धादशातयत् ।। १०

ततोऽङ्ग संविदं स्वस्थां प्रतिभासमुपागताम् ।
सद्यो जातशिशुज्ञानसमानकलनामलम् ।। ११
निमेषार्धार्धभागेन कालेन कलनां प्रभुः ।
जहौ चितश्चेत्यदशां स्पन्दशक्तिमिवानिलः ।। १२
पश्यन्तीपदमासाद्य सत्तामात्रात्मके ततः ।
प्रसुप्तपदमालम्ब्य तस्थौ गिरिरिवाचलः ।। १३
ततः सुषुप्तसंस्थानं स्थित्वा स्थित्वा विभुर्मनाक् ।
सुषुप्ते स्थैर्यमासाद्य तुर्यरूपमुपाययौ ।। १४
निरानन्दोऽपि सानन्दः सच्चासच्चापि तत्र सः ।
आसीन्न किंचित्किंचित्तत्प्रकाशस्तिमिरं यथा ।। १५
अचिन्मयं चिन्मयं च नेति नेति यदुच्यते ।
ततस्तत्संबभूवासौ यद्गिरामप्यगोचरः ।। १६
तदसौ सुसमं स्फारं पदं परमपावनम् ।
सर्वभावान्तरगतमभूत्सर्वविवर्जितम् ।। १७
यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां वरम् ।
विज्ञानमात्रं विज्ञानविदां यदमलं पदम् ।। १८
पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनाम् ।
शिवः शशिकलाङ्कानां कालः कालैकवादिनाम् ।। १९
आत्मात्मनस्तद्विदुषां नैरात्म्यं तादृशात्मनाम् ।
मध्यं माध्यमिकानां च सर्वं सुसमचेतसाम् ।। २०
यत्सर्वशास्त्रसिद्धान्तो यत्सर्वहृदयानुगम् ।
यत्सर्वं सर्वगं सार्वं यत्तत्तत्सदसौ स्थितः ।। २१
यदनुत्तमनिःस्पन्दं दीप्यते तेजसामपि ।
स्वानुभूत्यैकमात्रं यद्यत्तत्तत्सदसौ स्थितः ।। २२
यदेकं चाप्यनेकं च साञ्जनं च निरञ्जनम् ।
यत्सर्वं चाप्यसर्वं च यत्तत्तत्सदसौ स्थितः ।। २३

अजमजरमनाद्यनेकमेकं

पदममलं सकलं च निष्कलं च ।

स्थित इति स तदा नभःस्वरूपा-

दपि विमलस्थितिरीश्वरः क्षणेन ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपायेषूपशमप्रकरणे वीतहव्यनिर्वाणो नाम सप्ताशीतितमः सर्गः ।।

८७ ।।